श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ अमिरुतरञ्जनि ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ अमिरुतरञ्जनि ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

दत्वा चित्तं स्थिरं नः परमकरुणया सूरिसेव्यो रमेशः
तत्त्वज्ञानानुकम्पामहितसुमनसां सम्प्रदायेऽतिशुद्धे।
योग्योपायेन तुष्टः स्वभर इति हि कारुण्यमस्मासु तन्वन्
जन्माद्युन्मूल्य दुःखं भवति मुदितहृत् प्राप्नुम श्लाघ्यनिष्ठाम्॥ 1 ॥

मथित्वाब्धिं देवताभ्यस्सुधां दत्तवतः श्रियः।
पत्युः पदप्रदानस्मदाचार्यान् वयमाश्रिताः॥ 2 ॥

मुक्तेर्निदानस्य हरेर्दयायाः
शिरोऽवतंसीकरणाय पूर्वम्।
जानीहि तत्त्वत्रयमेतयादिशा
परं समीचीनहितं भवेत्ते॥ 3 ॥

त्रिषु त्रिकं त्रिद्विकं च त्रिचतुष्टयमेव च।
ज्ञातेष्वेतेषु सम्यक् च प्रणश्येत् दुःखमत्र हि॥ 4 ॥

यो वाचेतनचेतने सुकलयन्नात्मीयदेहं परः
यश्चोर्व्या सहितं चखाद नवनीतं चादरात् दध्यपि।
यो दैत्यान् कलमे जघान यवसोन्मूलैकनीत्योद्धतान्
अस्मद्देशिकसूक्तयो वलयवत् भान्त्यात्महस्ते सदा॥ 5 ॥

संशुद्धश्रुतिमस्तकस्य तुलसीमौळेः प्रपन्नाः पदोः
निर्वीचिं त्वमृतोदधिं जलधरं पीताम्भुधिं मण्यगम्।
मौल्यातीत महोऽब्रुवंस्तदुपमं ज्योत्स्नातपोद्भासितं
नेदं स्याच्च विमर्शने निरुपमो ह्यम्भोजवासापतिः॥ 6॥

परमपदविदातुर्मूलवेदोदितस्य
जलधरगुणमूर्तेः तं स्वभावं विदन्तः।
कतिचन गुरवश्चापौरुषेये रहस्ये
त्रय उपदिदिशुर्नस्त्रित्रिकार्थान् समस्तान्॥ 7॥

शेषी मेऽहं भरो मे फलमिति च धियं संत्यजन् सर्वमेतत्
सर्वेशे सर्वशेषिण्यगमयमतुलश्रीशपादावुपायम्।
ज्ञात्वोपेयं च विघ्नानहनमभिहितं यद्धितं तन्नियन्त्रा
लेभे श्रेष्ठोपकारानिह शुचमजहां नित्ययोगे ह्युपेते॥ 8॥

सर्वाण्येतानि तत्त्वान्यतिशयकृपया बोधयित्वा च सम्यक्
दातुर्मुक्त्येकपद्या असदृशचरणौ स्तः पृथिव्यामुपायौ।
तस्मिन्नानन्दपूर्णेऽमृतमयमिति च प्राहुराचार्यवर्याः
अस्मानध्यापयंस्ते स्वयमिहकुशलास्तारमुख्यान् हितार्थान्॥ 9॥

श्रीमन्नारायणो नश्चिदचिदिति महाद्विर्द्विकाम्नायमौळौ
तत्त्वानि त्रीण्यमूनि क्वचिदहनि निशम्याथ नोज्जीवनार्थम्।
इच्छन्त्यन्यं हि धीरा हृदयगमखिलं मूलमन्त्रस्य सारं
सम्यक् विज्ञाय चाष्टाक्षरमहितगुणाष्टाहितेष्टाश्श्रयन्ते॥ 10॥

हेतुर्विश्वान्तरात्माखिलजगदविता श्रीसहायो दयाभ्रः
भ्राजिष्णोरेवमात्मान इह च तनवस्तस्य नारायणस्य।
जित्वाऽहन्तां सुसेवोचितविधमचलाम्ब्वादि मायां च कालं
प्रत्येकाकाशरूपं त्विति धृतसहजाकारभूतस्वभावान्॥ 11.1॥

सूक्ष्मभूषागुणयुतैः गुरुभिर्दर्शितान् वयम्।
यथाद्राक्ष्म तथैवेह तानवच्मावधानतः॥ **11.2**॥

अमलगा अखिलाश्च तथाविधाः
हृदि न इत्थमिहालिलिखुर्विधाः।
श्रुतिरुचा बहुधा सुविमृश्य तं
तिमिरनाशिनमिन्दुमुपाश्रिताः॥ **12**॥

रक्तस्वर्णाभपादद्वयमहितसुवर्णाब्जवासेप्सितश्री -
रङ्गेशप्रेमशाल्याश्रितजनचरणाब्जोत्तमाङ्गावतंसाः।
आनन्दस्तोमगण्यान् पफणिम सकलानेकपञ्चाशदर्थान्
वर्णस्थान् आत्मरक्षामृतमिव कलितान् तान् रहस्यत्रयेऽत्र॥ **13**॥

ज्ञाता ज्योतिस्स्वरूपोऽस्म्यहमिह न पुनर्देहरूपादिरन्यः
दिव्यास्थानस्थितश्रीपतिचरणनिषेव्येव नान्यं ह्युपेयाम्।
पीयूषाभस्य पादौ शरणमिति ययावुज्ज्वलामेयसेवा -
लङ्कारैर्भूषितान्तः करणमहिमवानेव भूयासमद्य॥ **14**॥

आत्माचारसुशीलदेशिककृतोपायप्रभावात् यथा
तूलानामिह राशि राशु दहनात् पापानि दग्धानि नः।
निद्रागात्रनिवृत्तये च नियतं कालं प्रतीक्षामहे
प्राप्स्यामो न पुनर्जनिं त्विह महोदन्वद्गुणं संश्रिताः॥ **15**॥

औदार्योत्कर्षहर्षप्रगुणकरुणया माधवस्येष्टदातुः
याथार्थ्यं जानतां तैरनुपमवचनैर्जातया दार्ढ्यमत्या।
मत्या प्रोत्सारयामस्तिमिर मिततं चापकर्षं जहीमः
याथातथ्यं यथा वा वयमखिलमवाप्स्याम ईदृक्प्रकर्षम्॥ **16**॥

नारायणो हि परमो वयमेतदीयाः
शेषा अशेषभुवनं वपुरस्य चेति।
वेदैर्गुणाढ्यकरुणाशुगुरूपदेशात्
अज्ञानमाजिहि मतिं त्वचलामवापम्॥ **17**॥

सिद्धोपायस्स एवेत्यवगमयितृषु श्रीदयैकाश्रयेषु
रक्ष्यत्वेनैव गृह्णन् सपदि करिगिरिश्रीधरो नस्तदैव।
मुक्तावभ्यर्थितायां निजपदयुगळीं प्रापयत्येव भूयः
नैवोत्पत्तिर्यदाप्तं शुभकरमखिलं नास्ति नो ह्यात्मभारः॥ **18**॥

श्रीशेऽस्मांश्च समर्पयत्सु गुरुषु क्षुद्रे फलेऽसङ्गिषु
रक्ष्यत्वेन गृहीतवत्यथ जगन्मातुः प्रिये नस्स्वयम्।
भूयोजन्म निवार्य शाश्वतपरव्योम्नि प्रतिष्ठापयेत्
स्वान्तानन्दि कुतो न चासि कथयाम्यत्यन्तयुक्तं वचः॥ **19.1**॥

यावत्स्थितिस्स्यादिह ते निरागसं
संप्रार्थ्य बोधं निखिलं च लब्ध्वा।
प्राप्तव्यमस्मास्विह तुष्टिमत्सु
त्वमेव नोदास्व हि शेषवृत्तौ॥ **19.2**॥

चार्वाकार्हतसांख्यशैवकणभुक् दुस्तर्कबौद्धद्यसत् -
तन्त्रोन्मूलकृते निगूढमतुलं भावं श्रुतेस्त्रिंशता।
वाक्यैर्व्याकृतवान् विविच्य विशदं त्वेतच्च चित्ते बुधाः
ऐकाग्र्येण दृढं निधाय निबिडं मोहान्धकारं हत॥ **20**॥

सार्वैश्वर्यनिराचिकीर्षुपुरुषानप्यात्मजान् मातृवत्
कारुण्यैकतनोर्मनोनिवसतेस्तस्य स्वभावं हरेः।
विज्ञायोचिम देशिकाग्रत उपायाता गिरो वादिनां
मोघाः कण्टकवर्तिनां झरपरीवाहस्थफेरूपमाः॥ **21**॥

सर्वत्रातुर्गुरूणां पितुरधिचरणाम्भोरुहं चक्रपाणेः
तेषामेव प्रिया ये गुरुभिरभिहितं सत्यकारुण्यभावाम्।
मा कार्षीस्त्वं ह्यधर्मं त्विति निजशिरसाऽलङ्कृता धीर्विशुद्धा
मिथ्यावैर्यक्षशारोपमकरणदशैकं प्रियत्वं समेयुः॥ 22॥

देवेनानन्तपुंसा विहत उदित उद्वेलवाराशिरासीत्
ह्रस्वाकारस्य हस्ते चुळक इव मुनेः कीर्तिमूर्तेः प्रणेतुः।
शास्त्रस्य द्राविडस्य श्रुतिनिकरनिगूढार्थमाधाय चित्ते
वाचोऽस्मद्बन्धनाशप्रमुदितगुरुकारुण्यलब्धाः किलैताः॥ 23॥

आचार्या अस्मदीयास्त्रिगुणमयविचित्रा चतुर्विंशतिश्च
प्रोक्तं तत्र त्रिधैतद्गुणरहितलसत्कालिकावर्तचक्रम्।
नाकस्सत्त्वैकगुण्यो निरवधि विभवश्चेत्यमी देहभूताः
श्रीमन्नारायणस्येत्यपि तु विधुरिताश्चिद्गुणेनेत्यवोचुः॥ 24॥

मदीयमिति नैव किन्त्वहमिति ब्रुवन्नात्मनः
प्रभावमविदन् परं मम भरस्तु ते श्रीमते।
इतीह महता दृढं स्वतपसापि निर्धारिते
परिभ्रमति कैतवात् जगति पश्य वृद्धिं न चैत्॥ 25॥

ये नानाविधकर्मभिर्दृढगुणैर्बद्धास्तथा ये पुनः
सत्कृत्येषु नियोजकस्य सुपदं नारायणस्याश्रिताः।
ये वानादिभवात्मकृत्यविधुराः नित्या विदीप्तास्सुराः
आम्नायोक्तकरान् निदन्त इह तान् जीवान् वयं चोन्नताः॥ 26॥

आरण्येष्वखिलेषु यत्पदयुगोत्तंसीकृतेषु स्वतः
उच्चस्थो जगतां निदानमपि संक्षुब्धो न केनापि नः।
अंहस्संहरणस्स्वयं सुसरणौ नारायणस्सन् स्थितः
कारुण्येन सुदर्शयत्यसदृशीं दिव्याकृतिं स्वां शुभाम्॥ 27॥

क्रूरांहः कारिणी सा प्रकृतिरिह तदन्वर्तिजीवात्मवर्गः
अन्तर्यन्ता तदन्तस्सकलमनुगतो भाति नारायणस्सः।
आम्नायान्तार्थ एषो जलनिधिगतशुक्तिस्थमुक्तोपमोऽर्थः
नानाशास्त्रार्थशाखास्वधिगतमनुविज्ञेय इत्यभ्यधाम॥ 28॥

काष्ठास्वष्टासु सर्वत्र च वरिवसिता आत्तकीर्तिप्रकर्षाः
शुद्धास्तत्त्वार्थसारप्रदचुळकरसं प्रादुरेनं पिबन्ति।
पूतास्ते ह्येव तत्त्वत्रयगतयुगळत्यागिपाषण्डिपाशान्
छित्वा निर्दुष्टतत्त्वत्रयमतिशयितं प्राक्तनं स्थापयन्ति॥ 29॥

अंहस्संहतिनाशिनां श्रुतिविदां सर्वं वयं सूक्तिभिः
विज्ञायाथ मनोनिवासिकमलाकान्तस्य पादद्वयम्।
दुर्ज्ञेयात्मगुणं महौषधसुधामूर्तेः महत् भाग्यदम्
सुच्छायं तदुपायमाप्नुम फलं चेति द्विधेव स्थितम्॥ 30॥

अध्येतव्यश्रुतिषु चतसृष्वग्र्यमन्त्रत्रयार्थे
नीतेर्मार्गात् च्युतिरकलिता स्यात्तथा स्थापिताः स्मः।
यं नामान्यप्यनुगुणयुतान्यन्वहं श्रीः सहस्रम्
पद्मा जुष्टा यमतिकृपया तस्य नारायणस्य॥ 31॥

देहं जीवं स्थिरं तं ददतिदययाऽधिष्ठितोऽन्तस्त्विषेशः
स्वेनैवात्मा प्रदत्तोऽप्यथ सुमति मयं मामको नेति यच्छन्।
नित्यानन्दं वितीर्य स्वचरितसुपथो मां स्वभारं विदित्वा
दत्वा दिव्यं पदं स्वं सुमनसमवृणोत् सूरिसेवां हि दातुम्॥ 32॥

लक्ष्मीशस्य पदद्वयं शरणमित्याश्रित्य गाढं परम्
लक्ष्मीशस्य पदारविन्दयुगळीमेवोपयन्तो बुधाः।
लक्ष्मीशैककृपावशादविपदं नित्यैकलभ्यां श्रियम्
कारुण्यातिशयाद्विमृश्य सकलां नो देशिकाः प्राददुः॥ 33॥

लक्ष्म्या योगान्नियोक्त्र्या दृढतरसुगुणश्रीनिधेस्सद्गुणस्य
स्वार्हेभ्यो लक्ष्यलक्ष्ये ह्यतिशयसुगुणे दिव्यकार्येऽङ्घ्रियुग्मम्।
प्रत्यक्षेणेक्षणीये स्वशरणवरणं स्थास्नुगत्याप्तिलाभः
पुंसामेते प्रकारा इह परिगणिता ह्यज्ञतानाशनाय॥ 34॥

लक्ष्मीनायकपादपद्मयुगळीं प्रीत्यैत्य सेवाप्तये
श्रीनारायणपादमेव शरणं संप्राप्तवत्स्वादरात्।
सन्मन्त्रं सकृदुक्तमात्मदमधीयाना द्वयाख्यं वयं
स्वायत्यां निरघाग्र्यजीवनविधौ याता स्थितिं स्थेयसीम्॥ 35॥

अनितरशरणेषु स्वैकनिष्ठेषु दोषं
कमपि न गणयन् सन्नत्र गोपाल आस्ते।
निखिलदुरितमुन्मूल्याथ सूरीन्द्रबृन्दैः
सह कलयितुकामः त्वं मनः ! स्तात् सुखेन॥ 36॥

धर्मास्सर्वे जहुर्मामपि तु न विजहन्नित्यधर्मः स्वयं मां
मत्वात्मीयान् मुकुन्दस्त्वखिलद उपकृन्मोदमानो दयाळुः।
त्वां शैलोन्मत्तदन्तावळदुरितचयान्मोक्षयिष्यामि मा भीः
इत्युक्त्या तस्य चेतो विशुच इह भवेमैव विश्वासभूम्ना॥ 37॥

अंहस्संहतिनाशिनां श्रुतिविदां सर्वं वयं सूक्तिभिः
विज्ञायाथ मनोनिवासिकमलाकान्तस्य पादद्वयम्।
दुर्ज्ञेयात्मगुणं महौषधसुधामूर्तेः महत् भाग्यदम्
सुच्छायं तदुपायमाप्नुम फलं चेति द्विधेवस्थितम्॥ 38॥

मन्त्रे चाष्टाक्षरे षड्ङ्किमहितमनौ श्लोकमन्त्रेऽसमाने
सर्वत्र क्वाप्युपायं ह्यभिदधति तथा साधनत्यागिनो ये।
निक्षेपैकावलम्बाः परमपददृशो देशिकास्तेजसाग्र्याः
शिष्टास्तत्सेवकोऽहंदलति निभुकृपा त्र्यष्टके मेऽनुबन्धम्॥ 39॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेशिकप्रबन्धाधिष्ठिता सामृतरञ्जिनी।
श्लोकीकृता व्याकृता च गोपालार्येण सन्मुदे॥

॥ इति अमिरुतरञ्जनि सङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥